श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री अय्या देवनाथ तातदेशिकन् विरचितम्

# ॥ श्रीजम्बूपुरनिवास श्रीनिवासस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीजम्बूपुरनिवास श्रीनिवासस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीनिवासाय महते पुरुषाय नमो नमः।
यतः सर्वमिदं जातं स्थितमन्ते प्रलीयते॥ १॥

सरसि सरसिजार्थं न्यस्तपादे गजेन्द्रे
ग्रसति महति नक्रे घुष्यमाणे निदाने।
सपदि गरुडवेगात् यस्तमेत्याभ्यरक्षत्
स हरिरवितुमस्मान् जम्बुधाम्न्याविरासीत्॥ २॥

स हरिरुरसि लक्ष्मीं हस्तयोः शङ्खचक्रे
करमधिकटि वामं दक्षिणे दानमुद्राम्।
तदधिकमनोज्ञः त्रातुमद्यापि तिष्ठन्
भव शरणमिहेति प्रार्थनां प्रेक्षते नः॥ ३॥

तदुषसि निजतल्पादुत्थितैराशु सर्वैः
सरसि विहितसान्ध्यैरालयं तस्य गत्वा।
परिगतिनतिपूर्वं प्रार्थ्यतां तत्तदिष्टम्
तदनु स वितरेद्वः सर्वमिष्टं वदान्यः॥ ४॥

सकृदुदितमेतत् हृद्यपद्यत्रयं यः
पठति स शमिताद्यः त्यक्तरागस्त्रिवर्गे।
स्वकृतसुकृतभूम्ना साभिलाषोऽपवर्गे
परमपुरुषभक्त्या प्राप्नुयात् ब्रह्मलोकम्॥ ५॥

इति महदुपसत्त्या जातया तत्त्वमत्या
परमहितमवोचत् सङ्ग्रहं देवनाथः।

www.prapatti.com

स्वमहिमकथनेनानेन सर्वान्तरात्मा
विमलगुणपयोधिः प्रीयतां श्रीनिवासः॥ ६ ॥

॥ इति श्रीजम्बूपुरनिवास श्रीनिवासस्तोत्रं संपूर्णम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com